हरिद्रुरेषां प्रथमस्ततश्छगलितुम्बुरू ।
उलपेन चतुर्थेन [1]कालापकमिहोच्यते ॥

आलम्बिश्चरकः प्राचां [2]पलङ्गकमलाबुभौ ।
ऋचाभारुणि[3]ताण्ड्याश्च मध्यमीयास्त्रयोऽपरे ॥

श्यामायन उदीच्येषु उक्तः [4]कठकलापिनोः ।

चरकः इति वैशम्पायनस्याख्या, तत्सम्बन्धेन [5]सर्वे तदन्तेवासिनश्चरकाः इत्युच्यन्ते ॥

## पुराणप्रोक्तेषु ब्राह्मणकल्पेषु । (१०५/१४८५)

प्रत्ययार्थविशेषणमेतत् । [6]तृतीयासमर्थात् प्रोक्ते णिनिः प्रत्ययो भवति यत्[7] प्रोक्तं [8]पुराणप्रोक्ताश्चेद् ब्राह्मणकल्पास्ते भवन्ति । पुराणेन [9]चिरन्तनेन [10]मुनिना प्रोक्ताः । ब्राह्मणेषु तावत्–भाल्लविनः । [11]शाट्यायनिनः । ऐतरेयिणः । कल्पेषु – पैङ्गी कल्पः । आरुणपराजी । पुराणप्रोक्तेषु इति किम् ? [12]याज्ञवल्कानि ब्राह्मणानि । [13]आश्मरथः कल्पः । याज्ञवल्क्यादयोऽचिरकाला इत्याख्यानेषु वार्ता । तथा व्यवहरति सूत्रकारः । तद्विषयता कस्मान्न भवति ? प्रतिपदं ब्राह्मणेषु यः प्रत्ययस्तस्य तद्विषयता विधीयते णिनेः । अयं तु याज्ञवल्क्यशब्दस्य [14]कण्वादिषु पाठादण् । [15]न वाऽयं योगश्छन्दोऽधिकार[16]मनुवर्तयति, तेन कल्पेष्वपि न [17]भवति । पुराण इति निपातनात् तुडभावः[18] । न [19]वाऽत्यन्तबाधैव, तेन पुरातनमित्यपि भवति ॥

## शौनकादिभ्यश्छन्दसि । (१०६/१४८६)

शौनक इत्येवमादिभ्यः[20] णिनिः प्रत्ययो भवति तेन प्रोक्तम् इत्येतस्मिन् [21]विषये छन्दस्यभिधेये । छाणोरपवादः । शौनकेन प्रोक्तमधीयते शौनकिनः (कौ. सू, ८५. ८) । वाजसनेयिनः (आ. श्रौ. १. ८. १२) । छन्दसि इति किम् ? शौनकीया [22]शिक्षा । [23]कठशाठ इत्यत्र पठ्यते तत्संहतार्थं[24], केवलाद्धि लुकं वक्ष्यति । [25]कठशाठाभ्यां प्रोक्तमधीयते [26]काठशाठिनः ।

शौनक । वाजसनेय । [27]साङ्गरव । शार्ङ्गरव । [28]साम्पेय । शाखेय । खाण्डायन । [29]स्कन्ध । स्कन्द । [30]देवदत्तशठ । रज्जुकण्ठ । [31]रज्जुभार । कठशाठ । कशाय । तलवकार । [32]पुरुषांसक । [33]अश्वपेय । शौनकादिः ॥

---

1. कलापिकम् क, कालापकमिवोच्यते ह. 2. फलिंग° ड. 3. °ताण्ड्यश्च ड. 4. कठकलापिनौ इ. 5. सर्वे नास्ति ड. 6. तेन इत्यधिकम् फ. 7. तत् इत्यधिकम् ब. क. फ. 8. पुराणप्रोक्तम् इति ब्राह्मण–कल्पास्ते ड. 9. चिरन्तनेन नास्ति ह. 10. ऋषिणा प्रोक्तम् पुराणप्रोक्तम् क.ड.इ.ह. ।11. शाण्डायनिनः ड 12. याज्ञवल्क्यानि ब. 13. अश्मारथः इ. 14. कण्वादिभ्यो गोत्रे इत्यधिकम् ब. 15. नायं फ, न चायं ड. ब. 16. अनुवर्तते ब. फ. 17. विधीयते इ. 18. विधीयते इत्यधिकम् इ. 19. च फ. 20. शब्देभ्यः इत्यधिकम् ह, प्रातिपदिकेभ्यः इत्यधिकम् क. 21. अर्थे ह. 22. शिष्याः क. 23. कठशठ ब.ड. 24. वचनम् इत्यधिकम् ड. 25 कठशठाभ्याम् ड. 26. काठशठिनः क. 27. शाकर ब, साङ्गेरव क, साङ्गर ड. 28. शौपेय शाम्बेय ब, शाप्येय. शापेय इ. 29. स्तम्भ ब. 30. देवदत्त अर्जुन रज्जु ड, देवदर्शन ब. 31. रज्जुहार फ. 32. पुरुषसख इ. ह. 33. अश्वपेजः ब. क.